# Bhavalinga Stotram

# ભાવલિઙ્ગસ્તોત્રમ્

## Document Information

Text title : Bhavalinga Stotram

File name : bhAvalingastotram.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 36| 81-180||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# ભાવલિઙ્ગસ્તોત્રમ્

-

શિવં દેહિ મે ભાવલિઙ્ગાલયાશુ પ્રસીદ પ્રસીદ પ્રસીદાદરેણ ।
ત્વદારાધનાયત્તચિત્તાય નિત્યં વિકારાન્તરાયાપકારાય ભૂયઃ ॥

-

નમો ભાવલિઙ્ગાય ભાવાલયાય સ્મરાપારગર્વાપહારોદ્યતાય ।
નમઃ પુણ્યકલ્યાણપૂર્ણાર્ણવાય પ્રમાણાગ્રગણ્યાગ્રગણ્યાય તુભ્યમ્ ॥ ૧॥

ઇદં ભાવલિઙ્ગં ગતાનઙ્ગસઙ્ગં યદઙ્ગોપસઙ્ગં પ્રસઙ્ગેન શઙ્ગમ્ ।
વિલીનાભિષઙ્ગ મહારોગભઙ્ગં કરોતીતિ મન્યે તતસ્તે નમોઽસ્તુ ॥ ૨॥

યદર્ધાઙ્ગમર્ધેન્દુખણ્ડં પ્રચણ્ડં પ્રભામણ્ડલાખણ્ડલારાધ્યમીડ્યમ્ ।
તદારાધ્યમારાધ્યકારાધ્યકાઢ્યં મુહુર્ભાવલિઙ્ગં વિપદ્ભોગભઙ્ગમ્ ॥ ૩॥

યદારાધનેનામરારાધ્યતા સ્યાત્ નરસ્યાધમસ્યાપિ સિદ્ધિપ્રસિદ્ધિઃ ।
તદારાધ્યમસ્માકમસ્મત્કુલસ્યાપ્યપાસ્યાન્યદેવં સદા ભાવલિઙ્ગમ્ ॥ ૪॥

પ્રભૂતેષુ પુણ્યેષ્વગણ્યેષુ ભક્તિઃ ભવેદ્ભાવલિઙ્ગે ભવેદ્ભાવનાપિ ।
ભવે ભાવલિઙ્ગપ્રભાવપ્રબોધે પ્રમોદેન મોદાય સમ્પાદનીયઃ ॥ ૫॥

સરત્યાશુ સંસારઘોરાન્ધકારઃ સ્ફુરદ્ભાવલિઙ્ગાઙ્ગસૂર્યપ્રકાશે ।
વિશિષ્ટા વિશિષ્ટાઽદ્ય ખદ્યોતવાર્તા કૃતાન્તાન્તવાર્તાઽપિ તસ્મિન્ કુતઃ સ્યાત્ ॥ ૬॥

અવિદ્યામહાવર્તગર્તાનુવૃત્તિઃ કુતો ભાવલિઙ્ગાર્કકોટિપ્રકાશે ।
તદારાધનામોદમાનન્દસિન્ધો શિવજ્ઞાનચન્દ્રોઽપિ કોઽપિ પ્રજાતઃ ॥ ૭॥

અહો ભાગ્યમસ્માકમસ્મત્કુલસ્યાપ્યભૂદ્ભાવલિઙ્ગં પરં દૈવતં નઃ ।
વયં ધન્યધન્યાગ્રગણ્યાગ્રગણ્યાઃ સદા ભાવલિઙ્ગાર્ચનાસક્તચિત્તાઃ ॥ ૮॥

યદા ભાવલિઙ્ગાર્ચનાભક્તિલેશઃ તદા તાવદાપત્સમૂહપ્રણાશઃ ।
તદારાધનાસક્તલેશપ્રકાશે મહાનન્દરાશિપ્રવેશોઽનુવેલમ્ ॥ ૯॥

નમન્તઃ સ્મરન્તઃ સકૃત્ પૂજયન્તઃ ભવં ભાવલિઙ્ગે મુદા ભાવયન્તઃ ।
લભન્તે ગણેશત્વમપ્રાપ્યમન્યૈઃ ઇહ પ્રાપ્ય દુષ્પ્રાપમોદામ્બુરાશિમ્ ॥ ૧૦॥

ન ચાન્નાભિલાષાऽऽસ્પદાલાભશઙ્કા નચાન્યત્ર વા ભાવલિઙ્ગાર્ચકાનામ્ ।
ઇહામુત્ર સૌખ્યાભિવૃદ્ધિર્ભવિત્રી ભુજં સમ્યગુદ્ધૃત્ય સત્યં મયોક્તમ્ ॥ ૧૧॥

ન ચન્દ્રવાઞ્છા ન ચેન્દ્રત્વવાઞ્છા ન ચોપેન્દ્રતાબ્જાસનત્વાદિવાઞ્છા ।
યતસ્તાન્યપાયાન્વિતાનીતિ મન્યે પરં ત્વીપ્સિતં ભાવલિઙ્ગાર્ચનં મે ॥ ૧૨॥

ઇદં ભાવલિઙ્ગાર્ચન કામધેનુઃ સમસ્તામરાશાસ્યકલ્પદ્રુમો વા ।
ઇદં મર્ત્યદુષ્પ્રાપચિન્તામણિર્ણા ફલાનિ પ્રસૂતે વિચિત્રાણિ નિત્યમ્ ॥ ૧૩॥

યતોऽનન્યલભ્યાનિ સૂતે ફલાનિ પ્રકૃષ્ટાનિ વાઞ્છાસ્પદાન્યાનિ તાનિ ।
અતઃ કામધેનુર્ન કલ્પો મણિર્વા પરં ત્વન્યદેવાદ્ભુતં ભાવલિઙ્ગમ્ ॥ ૧૪॥

ક્ષણાર્ધાધકોટ્યંશકોટ્યંશમાત્રં વયં ભાવલિઙ્ગં સ્મરામો યતોऽતઃ ।
પ્રકૃષ્ટ પ્રકૃષ્ટ પ્રકૃષ્ટ પ્રકૃષ્ટ પ્રકૃષ્ટ પ્રકૃષ્ટ પ્રકૃષ્ટ પ્રકૃષ્ટાઃ ॥ ૧૫॥

મહાભૂત જાતાપ્રજાતાતિભીતિઃ મહામૃત્યુદૂત પ્રભૂતાતિભીતિઃ ।
મહારોગસઙ્ઘાતજાતાऽપિ ભીતિઃ કુતો ભાવલિઙ્ગસ્ય સઙ્ગેऽઙ્ગભાગે ॥ ૧૬॥

સકૃજ્જન્મમધ્યે મુદા ભાવલિઙ્ગં સ્મરન્તં સ્મરન્તં કૃતાન્તસ્ય દૂતઃ ।
પ્રમત્તોऽપિ તન્માગસંસર્ગભીતઃ પ્રભૂતપ્રતાપોऽપિ દૂરં પ્રયાતિ ॥ ૧૭॥

નમો ભાવલિઙ્ગાર્ચકારાધકેભ્યઃ તદારાધકેભ્યસ્તદારાધકેભ્યઃ ।
તદારાધકેભ્યસ્તદારાધ કેભ્યઃ તદારાધકેભ્યસ્તદારાધકેભ્યઃ ॥ ૧૮॥

યમઃ કમ્પયન્ પાપતાપોપભીતઃ સ્વદૂતાન્ સમાહૂય તત્કર્ણદેશે ।
મુહુર્ભાવલિઙ્ગાર્ચકાગારમાર્ગે ન ગન્તવ્યમિત્યેવ જલ્પત્યનુચૈઃ ॥ ૧૯॥

કૃતે ભાવલિઙ્ગાર્ચનોદ્યોગમાત્રે ત્રિનેત્રોऽપિ કિં દેયમસ્મૈ મયેતિ ।
વિચારૈરપોરૈર્નયત્યેવ કાલં તતઃ કાલવાર્તાપ્રવૃત્તિઃ કુતોऽત્ર ॥ ૨૦॥

પ્રભાવં ભવો ભાવલિઙ્ગાર્ચકાનાં પરં વેદ વેદોऽપિ તન્નૈવ વેદ ।
અતસ્તદ્વિચારે વિરિઞ્ચિઃ કુલઞ્ચઃ કથં ચઞ્ચુરાસ્તદ્વિચારે તદન્યે ॥ ૨૧॥

વરં ભાવલિઙ્ગાઙ્ગદૌવારિકોરુસ્ફુરદ્વેત્રપાત્રત્વમિત્યાદરેણ ।
તદિચ્છામુપેન્દ્રેન્દ્રચન્દ્રાદિદેવાઃ પ્રકુર્વન્તિ ધર્મં વિહાય સ્વકીયમ્ ॥ ૨૨॥

રમા ભાવલિઙ્ગાઙ્ગ તુઙ્ગોત્તમાઙ્ગે વિચિત્રાતપત્રામિતછાયયા સા ।
અવિચ્છિન્નમેવાપરિચ્છિન્નયા ચાપરિચ્છિન્નમેવ પ્રકામં કરોતિ ॥ ૨૩॥

ન સંસારપઙ્કાઙ્કિતો નિષ્કલઙ્કો નિરાતઙ્ક એવાતિરઙ્કોઽપ્યશઙ્કઃ ।
શશાઙ્કાઙ્કિતં ભાવલિઙ્ગાધિવાસં સ્મરન્ વાસવત્વાદિવાઞ્છાં જહાતિ ॥ ૨૪॥

રમા ભાવલિઙ્ગાર્ચકાર્ચાપરા સા નુતિં તસ્ય કર્તું પ્રદત્તૈવ વાણી ।
તદઙ્ઘ્ર્યર્હણાં રોહિણી સા શચી ચ અવશ્યં સુરાશાસ્યમાશાસ્યમસ્ય ॥ ૨૫॥

ચિરં ભાવલિઙ્ગેશપાદારવિન્દં મનશ્ચઞ્ચરીકશ્ચકાર સ્થિતિં મે ।
સ ધર્માર્થકામાપવર્ગસ્વરૂપૈઃ મરન્દૈરમન્દૈર્વિનોદં કરોતિ ॥ ૨૬॥

અહં ભાવલિઙ્ગેશપાદારવિન્દં સ્વચિત્તેન મૂર્ધ્ના પ્રબદ્ધં કરોમિ ।
મદીયં હૃતં માનસં કિં ત્વયેતિ ત્રિલોક્યાં ન કોઽપ્યસ્તિ તે મોચકોઽપિ ॥ ૨૭॥

નમઃ સુન્દરામન્દમન્દારકુન્દસ્ફુરન્નીરનીહારહારાકરાય ।
નિરાકારતારાચિરાપારહીર સ્વરાસાગરાકાર તે શઙ્કરાય ॥ ૨૮॥ (સ્વરઃ સાગરાકાર)

નલવ્યાલબાલામલવ્યાલમાલાકુલાનીલલોલાલસત્કુન્તલાય ।
સનીલાચલાનીલનીલોત્પલશ્રીવિલાસાય તે કાલકાલ પ્રણામઃ ॥ ૨૯॥

નમઃ સ્ફારકર્પૂરપૂરાભ્રગૌરજ્વરાપારસંસારભારાપકાર ।
પુરાખર્વગર્વપ્રસારાપહાર સ્મરાન્ધાન્ધકારે સ્મરારે હરાય ॥ ૩૦॥

નમશ્ચારુકાકોદરાનદ્ધરુદ્ધપ્રબુદ્ધાપ્રબુદ્ધેન્દુખણ્ડાર્ધમૌલે ।
મહાકાલકાલાનલાનીલભાલપ્રબાલપ્રવાલાધરાધીરલોલ ॥ ૩૧॥

નમશ્ચારુચામીકરાકરવીર પ્રભાપૂરસમ્પૂર્ણ સમ્પૂર્ણકામ ।
ન કિં કામકામાય કામં પ્રકામં કરોષિ પ્રદોષે ન રોષં કુરુષ્વ ॥ ૩૨॥

પ્રદોષેષુ તોષેણ નાટ્યં કરોષિ પ્રદોષેષુ રોષો ન તેઽતઃ પ્રદોષે ।
પ્રદોષેષુ રોષો ન મય્યપ્યતો માં પ્રદોષેષુ વા ભાવયન્નાસ્ત્રદોષમ્ ॥ ૩૩॥ (ભાવયન્નાસ્પ્રદોષમ્, ભાવય સ્વાસ્ર)

નરં સર્વદોષાકરં રાજસં માં સદા તામસં ઘોરસંસારલીનમ્ ।
હરારાધનાનન્દસન્દોહહીનં સહીનં વરાહીનહીન> પ્રપશ્ય ॥ ૩૪॥

ન સાધ્યસંસ્કારપારં ગતોઽહં ન સારસ્વતેષ્ટિપ્રચારાદરોઽહમ્ । (ન સાધ્યસ્ક સંસ્કાર)
ન ચાત્રાતિરાત્રાદ્ય પૂર્વાશ્રયોઽહં દયાપાત્રમાત્રં ત્રિનેત્રાવ માં ત્વમ્ ॥ ૩૫॥

મદીયાપરાધાનગાધાનબાધાન્ વિધિવ્યાધસમ્બન્ધબોધપ્રબુદ્ધાન્ ।
અવીતાનધીતપ્રદ્ધાપ્રબુદ્ધશ્રિયા ભ્રાન્તમત્રાન્તમીશાશુ પાહિ ॥ ૩૬॥

મદીયાનિ પાપાન્યપારામ્બુરાશિપ્રપૂરાપકારાણિ નાશં પ્રયાન્તિ ।

તવાનુગ્રહાદુષ્ટદુષ્ટગ્રહાણાં ક્વ વાર્તાઽપિ સા સ્યાત્ કુતોઽકૢગ્રહાણામ્ ॥ ૩૭॥

મદીયં મનઃ પાદપદ્મે તવાદ્ય પ્રવિષ્ટં પ્રકૃષ્ટં નિકૃષ્ટં ન જાતમ્ ।
અતસ્તન્ન માઽઽયાતુ માયા તુ મામા પ્રયાતુ પ્રયાતુ પ્રયાતુ પ્રયાતુ ॥ ૩૮॥

ભવત્પાદપદ્માશ્રિતં તન્મનો મે મદીયાપરાધાન્ ક્ષમસ્વેતિ મન્દમ્ ।
કદાચિન્નિવેદ્યાનિવેદ્યાનપીશ પ્રસાદાય સિદ્ધિં કરોતુ પ્રસન્નમ્ ॥ ૩૯॥

મનો જન્મજન્માન્તરાનન્તપુણ્યૈઃ ત્વદઙ્ઘ્ર્યમ્બુજારાધનાય પ્રવૃત્તમ્ ।
નિવૃત્તં ન તન્માસ્તુ માસ્તુ સ્વતન્ત્રપ્રવૃત્તં નિવૃત્તં કથં વા મહેશ ॥ ૪૦॥

શરણ્યઃ શરણ્યેષુ કો વા ત્વદન્યો મદન્યોઽપિ દીનઃ ક્વ વા ભૂતલેઽસ્મિન્ ।
અતસ્તદ્દ્વયં વીક્ષ્ય ભાલાક્ષલક્ષં ક્ષણં વા ક્ષણાર્ધં પ્રવિશ્યાદરેણ ॥ ૪૧॥

ન મે શારદાદિપ્રસાદાદ્યપેક્ષા ન વેદાદિબોધપ્રસાદાદ્યપેક્ષા ।
ક્ષણાર્ધં ત્વદઙ્ઘ્ર્યમ્બુજારાધને મે સદૈવાસ્તુ વાઞ્છા ન ચાન્યત્ર વાઞ્છા ॥ ૪૨॥

યદિ ત્વં મદીયં મનોબુદ્ધિગમ્યં પ્રસાદં પ્રદાતું પ્રવૃત્તસ્તદા મે ।
ભવન્નામમાત્રાનુરક્તં મદીયં મનઃ સર્વદાપ્યસ્તુ શમ્ભો પ્રસીદ ॥ ૪૩॥

વદાન્યાગ્રગણ્યાગ્રગણ્યાગ્રગણ્યઃ વદાન્યાતિમાન્યાતિમાન્યસ્ત્વમીશ ।
અનન્યાગ્રગણ્યાગ્રગણ્યાગ્રગણ્યઃ કલૌ કાલકાલાહમેવેતિ મન્યે ॥ ૪૪॥

ન તે દેયમપ્યસ્તિ ભક્ત્યા વિનાન્યત્ તદન્યન્ન મે પ્રાર્થનીયં ચ લોકે ।
ન સા ચઞ્ચલાતિસ્થિરા ત્વત્પદાબ્જે મહાકલ્પકોટિષ્વનન્તેષ્વપીશ ॥ ૪૫॥

દૃઢા સૈવ જન્યાપ્યનન્તા પ્રરૂઢા પુનર્વર્ધમાના નવૈવાનુવેલમ્ ।
ન જન્યત્વભાવત્વશઙ્કાસ્તુ તસ્યાં પ્રસાદસ્ય તે દુર્લભં ભાવિ કિંવા ॥ ૪૬॥

ન જન્યસ્વભાવસ્ય નિત્યત્વમસ્તીત્યવશ્યં ત્વયા નૈવ વક્તવ્યમીશ ।
કિમસ્ત્યપ્યશક્યં તવાપિ ત્રિલોક્યાં શિવાન્યાયવાર્તા ન મે રોચતેઽપિ ॥ ૪૭॥

ન તે ગૌતમાકાશનિત્યત્વવાદો મતો વેદવેદાન્તતત્ત્વજ્ઞમૂર્તે ।
ન તે જૈમિનેઃ શબ્દનિત્યત્વવાદો ન મિથ્યાત્વવાદોઽપિ વેદાન્તિનસ્તે ॥ ૪૮॥

ન બન્ધોઽપિ મોક્ષોઽપિ વેદાન્તશાસ્ત્રે તથા દૃષ્ટિસૃષ્ટિપ્રવાદોઽપિ દૃષ્ટઃ ।
અવિદ્યાવિલાસો ન કોઽપીહ કલ્પ્યો વિલાસૈર્યતસ્તે જગજ્જાલમાસીત્ ॥ ૪૯॥

ન ચાનન્તવેદાન્તવાર્તાવિચારે હરારાધકારાધ્યભાવાભિમાનઃ ।
સ ચેન્નાધુના કર્મમાર્ગો વિનષ્ટઃ શિવારાધનામાર્ગવાર્તા કુતઃ સ્યાત્ ॥ ૫૦॥

શિવારાધનં ચેત્ કદાચિત્પ્રમાદાત્ વિહાયૈકદાપિ સ્થિતે યાતના સ્યાત્ ।
મહાપાતકાનાં વિનાશઃ કદાચિત્ શિવારાધનેનેહ સમ્ભાવિતોઽપિ ॥ ૫૧॥

વરં મદ્યપાચારમાર્ગાભિમાનો વરં ચણ્ડચણ્ડાલમાર્ગપ્રવેશઃ ।
વરં નેશ્વરારાધનત્યાગમાર્ગઃ સ માર્ગો મહાયાતનામાર્ગ એવ ॥ ૫૨॥

ન નીરં હરાનર્પિતં પાનયોગ્યં સુરાકલ્પમલ્પં હિ તન્મૂત્રકલ્પમ્ ।
પ્રમોદેન પીત્વાપિ તત્ તાવદન્તે સદા યાતનાં પ્રાપ્નુવન્ત્યેવ વિપ્રાઃ ॥ ૫૩॥

શિવારાધને નાસ્તિ યસ્યાભિમાનઃ સ ચણ્ડાલચણ્ડાલ એવેતિ મન્યે ।
શિવારાધને યસ્ય ભક્તિઃ પ્રવૃદ્ધા સ વૃદ્ધઃ સુરાણામપીતિ પ્રસિદ્ધઃ ॥ ૫૪॥

શિવાનર્પિતાનાનિ ભુક્ત્વાતિમોહાત્ મલાશી ભવત્યેવ રાશિસ્ત્વઘાનામ્ ।
સ પાપસ્વરૂપઃ સદા યાતનાયાં નિમગ્નોઽતિદુઃખાનિ ભુઙ્ક્તે સુરોઽપિ ॥ ૫૫॥

કૃતાનન્તપાપો વિહાયેશ્વરાર્ચાં શિવાન્યાસક્તચિત્તોઽપિ મત્તઃ ।
મૃતે યાતનાન્તે શુનીગર્ભવાસં સમાસાદ્ય તસ્માનિવૃત્તો ન નૂનમ્ ॥ ૫૬॥

વધૂભોગકાલેઽપિ યઃ કાલકાલસ્વરૂપાનુસન્ધાનહીનઃ સ હીનઃ ।
પ્રતપ્તાયસાકારનારીશરીરં સમાલિઙ્ગ્ય દુઃખાનિ ભુઙ્ક્તે કદાચિત્ ॥ ૫૭॥

યદેવાપિ રમ્યં સ્વભોગોપયુક્તં તદીશાય સર્વં નિવેદ્યેશશેષઃ ।
અયં મહ્યમિત્યાદરેણાપિ ભુઙ્ક્તે મહાપુણ્યરાશિઃ સ ભુઙ્ક્તે સુખાનિ ॥ ૫૮॥

સુતં વા સમાલિઙ્ગ્ય તજ્જન્યસૌખ્યં નિવેદ્યામ્બિકાવલ્લભાયાદરેણ ।
અનન્તં સુખામ્ભોધિમાપ્નોતિ સત્યં પ્રવૃદ્ધાપિ તત્સન્તતિઃ સર્વદા સ્યાત્ ॥ ૫૯॥

શિવારાધનાય પ્રવૃત્તસ્ય વંશો ન નશ્યત્યવશ્યં પ્રસિદ્ધિં પ્રયાતિ ।
મહાનન્દકન્દત્વમાપ્નોતિ સત્યં મુકુન્દાદિવૃન્દારવૃન્દાભિવન્દ્યઃ ॥ ૬૦॥

વરં વન્ધ્યભાવો વરં ગર્ભનાશો વરં જન્મકાલપ્રણાશોઽપિ સત્યમ્ ।
વરં નૈવ કસ્યાપ્યશૈવત્વમેતત્ ફલં પાપરાશેરભાગ્યામ્બુરાશેઃ ॥ ૬૧॥

અશૈવત્વમાપ્નોત્યભાગ્યૈરભઙ્ગૈઃ વરં જારજત્વં વરં મદ્યપત્વમ્ ।
વરં સર્વપાપૌઘસઞ્જાતમૂર્તિસ્વરૂપત્વમિત્યેવ મન્યે મહેશ ॥ ૬૨॥

વરં પુલ્કસસ્યાપિ સમ્પ્રાપ્ય જન્મ સ્થિતસ્યાપિ ગોમાંસમાત્રાશનસ્ય ।
વરં બ્રહ્મહત્યાસહસ્રાદરસ્યાપ્યશૈવત્વમત્યન્તમેવાપકૃષ્ટમ્ ॥ ૬૩॥

અશૈવત્વમાસાદ્ય કૃત્વા સ્વનિન્દાં જ્વલદ્વહ્નિમધ્યે પ્રવિષ્ટોઽનુતપ્તઃ ।
મૃતઃ સદ્ગતિં પ્રાપ્ય શૈવત્વમેત્ય પ્રસાદેન શમ્ભોઃ સ મુક્તિં પ્રયાતિ ॥ ૬૪॥

વરં દાસદાસાનુદાસાનુદાસીસુતત્ત્વં યતસ્તસ્ય શૈવાનુબન્ધઃ ।
સ શૈવાનુબન્ધેન સંસારબન્ધાત્ વિમુક્તોઽપિ મુક્તો ભવેત્ પાપસઙ્ઘાત્ ॥ ૬૫॥

વરં શૈવગેહાઙ્ગણે કીટભાવઃ કદાચિત્ યતો ભૂતલેશાનુયોગઃ ।
તદુચ્છિષ્ટપાત્રાભિઘાતોઽપ્યઘઘ્નઃ યતસ્તસ્ય ભાગ્યેન સમ્ભાવિતઃ સ્યાત્ ॥ ૬૬॥

મહાદેવનૈવેદ્યશેષાશનાનાં પવિત્રાણિ ગાત્રાણિ તદ્ગન્ધવાહાન્ ।
સુરાસ્તાવદિચ્છન્તિ પાપાપનુત્ત્યૈ સદા ગન્ધવાહપ્રવેશપ્રવૃદ્ધાન્ ॥ ૬૭॥

યદા યત્ર શૈવઃ પ્રચારં કરોતિ પ્રભૂતૈરગણ્યૈઃ સ્વપુણ્યાબ્ધિસઙ્ઘૈઃ ।
તદા તત્ર નૃત્યન્તિ યત્ તત્પિતૃણાં સમૂહાઃ સ્વતઃ સ્વર્ગભોગં બિહાય ॥ ૬૮॥

ન ચ સ્વર્ગમાર્ગે તદાનન્દયોગઃ તતસ્તદ્વિહાયામરૈઃ સાકમેતે ।
પ્રનૃત્યન્તિ શૈવં ચરન્તં વસન્તં હસન્તો નમન્તો મુદા પૂજયન્તઃ ॥ ૬૯॥

શિવઃ શૈવમાલોક્ય તત્રાતિહૃષ્ટો નિવાસં કરોત્યમ્બિકાલોલદૃષ્ટિઃ ।
ઇતઃ કિં મમાપિ પ્રકૃષ્ટં પ્રકૃષ્ટં નિવાસસ્થલં સદ્વિલાસાનુકૂલમ્ ॥ ૭૦॥ (મદ્વિલાસાનુકૂલમ્)

સ શૈવપ્રભાવં પ્રભુઃ શમ્ભુરેકઃ પ્રજાનાતિ જાનાતિ ગૌરી ગણેશઃ ।
કુમારોઽપિ જાનાતિ વેદોઽપિ જાનાત્યતસ્તં વિધિર્વા હરિર્વા તદન્યઃ ॥ ૭૧॥

સતી શૈવમાતા ત્વશૈવસ્ય માતા પરં જારિણી ગાર્દભી વા શુની વા ।
વરં સૂકરી વા વરં કર્કટી વા વરં કર્કશા વા વરં રાક્ષસી વા ॥ ૭૨॥

પિતુઃ શૈવપુત્રસ્ય તસ્યૈવ ભાગ્યં સભાગ્યસ્તદન્યો ન લોકેષુ દૃષ્ટઃ ।
અશૈવસ્ય લોકે પિતા દુર્ભગાનાં વરિષ્ઠઃ વિષ્ઠાસુ જાતઃ કૃમિઃ સ્યાત્ ॥ ૭૩॥

શુભઃ શામ્ભવાનાં પ્રભાવઃ સ્વભાવઃ કથં માદૃશૈર્વર્ણનીયોઽપિ મૂઢૈઃ ।
કથં ભાવભાવપ્રભાવપ્રભાવઃ શ્રુતીનામગમ્યો મયા વર્ણનીયઃ ॥ ૭૪॥

યયા જિહ્વયા શામ્ભવાનાં પ્રભાવઃ પ્રભૂતો મહાપુણ્યસંયુક્તયાઽયમ્ ।
મયા વર્ણનીયોઽપિ વાણી વિચિત્રા પવિત્રા ભવત્વિત્યવશ્યં ન ચિત્રમ્ ॥ ૭૫॥

કૃપા શઙ્કરસ્યાપિ મય્યપ્યપારા યતો હારચર્યાવિચારપ્રવૃત્તઃ ।
અહં તાવદપ્યસ્મિ ધન્યો મદન્યો ન ભાવપ્રભાવસ્તવેષુ પ્રવૃત્તઃ ॥ ૭૬॥

અહં ધન્ય એવાસ્મિ માતાપિ ધન્યા પિતા મે સખા બન્ધુવર્ગોઽપિ ધન્યઃ ।
યતો ભાવમાર્ગપ્રવૃત્તાનુરક્તો વિરક્તોઽપિ સંસારવાર્તાસુ શમ્ભો ॥ ૭૭॥

અશૈવાનુકૂલં મનો માસ્તુ માસ્તુ પ્રમાદેન વા સ્વપ્રકાલેઽપિ માસ્તુ ।

અયં તાવદેકો વરઃ પ્રાર્થનીયો મમેશાન સર્વાત્મનામું પ્રયચ્છ ॥ ૭૮॥

ઇયં તાવદિચ્છા કથઞ્ચિત્પ્રજાતા શિવાનુગ્રહેણૈવ મે પાલનીયઃ ।
યયાતિપ્રવૃદ્ધા પ્રજાતા તથા મે પ્રસીદ પ્રસીદ પ્રભો ચન્દ્રમૌલે ॥ ૭૯॥

અશૈવૈઃ સહૈતસ્ય વાસઃ કદાચિત્ યદિ સ્યાત્ તદા તસ્ય વિઘ્નોઽસ્તુ શીઘ્રમ્ ।
ન તન્મિત્રમિત્રૈઃ ન તન્મિત્રમિત્રૈઃ મહેશાન સંલાપવાર્તાઽપિ માસ્તુ ॥ ૮૦॥

યથા ચણ્ડચણ્ડાલગેહાધિવાસઃ તથા સ્વાદશૈવૈઃ સહૈકત્ર વાસઃ ।
અતસ્તત્સહાવાસવિઘ્નોદયઃ સ્યાત્ દયા ચેદુમાકાન્ત તે મય્યવશ્યમ્ ॥ ૮૧॥

યદિ સ્યાદશૈવાનુરક્તં મનો મે તદા સ્યુઃ કૃતાન્તસ્ય દૂતાઃ પ્રમત્તાઃ ।
પ્રવૃત્તાઃ પ્રવૃત્તં પ્રકુર્વન્ત એવ પ્રબદ્ધ્વા પ્રણેયો મમાયં મમેતિ ॥ ૮૨॥

અશૈવૈઃ સહૈતસ્ય શૈવસ્ય વાસો મહાપત્સમૂહપ્રવેશોઽપિ માસ્તુ ।
સ યસ્માદગાધવ્યથાહેતુભૂતો ન ચાપત્સમૂહસ્તથા દુઃખહેતુઃ ॥ ૮૩॥

અહં ચેદપાત્રં શિવાનુગ્રહસ્ય ત્રિનેત્રાશુ મૃત્યું પરં પ્રેરયસ્વ ।
ન ચાશૈવસઙ્ગાય માં પ્રેરયસ્વ પ્રસાદોઽયમેવેશ તે મહ્યમદ્ય ॥ ૮૪॥

અસન્ધ્યાદિકર્માનુરાગાનુરાગો યથા શઙ્કરારાધને સાધને મે । (ન સન્ધ્યાદિ)
અસાધ્યે શિવાનુગ્રહે સઙ્ગ્રહે વા સમગ્રસ્ય પુણ્યામ્બુરાશેર્મહેશ ॥ ૮૫॥

ન નિત્યેન નૈમિત્તિકેનાપિ કેનાપ્યપૂર્વા ક્રિયાહેતુભૂતેન મુક્તિઃ ।
યતઃ શઙ્કરાનુગ્રહેણૈવ મુક્તિઃ સ તાવચ્છિવારાધનેનૈવ લભ્યઃ ॥ ૮૬॥

જડાઃ કેવલં કર્મણા મુક્તિમેકે વદન્તઃ શ્રુતાપારવેદાન્તમાર્ગાઃ ।
ન તૈરસ્મદીયાનિ શાસ્ત્રાણિ તાવત્ શ્રુતાનીતિ મન્યે બહૂનિ પ્રમત્તૈઃ ॥ ૮૭॥

કિમેતાદૃશં કર્મ મોક્ષોપયુક્તં ન મીમાંસયા તાવદેતદ્વિવેકઃ ।
વિધિઃ કુત્ર વા દ્વાદશાધ્યાયમધ્યે ન કુત્રાપિ દૃષ્ટો ન વા વાર્તિકેઽપિ ॥ ૮૮॥

ન ચ બ્રહ્મમીમાંસયા તદ્વિવેકો ન ચોપાસનામાર્ગભિન્નોઽપિ માર્ગઃ ।
ન તસ્યાઃ ફલં મોક્ષરૂપં પ્રકૃષ્ટં પ્રકૃષ્ટં ફલં તત્ત્વવિજ્ઞાનસાધ્યમ્ ॥ ૮૯॥

ન ચોપાસના ચિત્તશુદ્ધિં વિનાન્યત્ ફલં કર્તુમેકં સમર્થા સમર્થા ।
કથં વા સ સાધ્યોઽપિ મોક્ષઃ સ નિત્યઃ વદાદ્યાશુ વેદાન્તમાર્ગપ્રવિષ્ટઃ ॥ ૯૦॥

મિતં ભાવનાયાઃ સ્વરૂપં ન કેનાપ્યતસ્તત્પરિજ્ઞાનશૂન્યેન કેન ।
કથં તસ્ય મોક્ષસ્ય સાધ્યત્વવાદઃ સ્વનિર્વાહ્યમધ્યે બલાત્ પાતનીયઃ ॥ ૯૧॥

ય એવાક્ષપાદસ્ય મોક્ષઃ સ સાધ્યઃ સ તાવત્ પરં ધ્વંસ એવાવિનાશી । (પરિધ્વંસઃ)
સ તત્ત્વાવબોધસ્ય સાધ્યઃ સ તાવત્સ વેદાન્તશાસ્ત્રાવિરુદ્ધો વિરુદ્ધઃ ॥ ૯૨॥

અલં શાસ્ત્રવાર્તાભિરસ્માકમેકઃ શિવાનુગ્રહો મોક્ષહેતુઃ સ તાવત્ ।
શિવારાધનેનૈવ તત્રાધિકારી પરં શામ્ભવઃ કોઽપિ ધન્યોઽતિધન્યઃ ॥ ૯૩॥

શિવાદ્વૈતવાર્તા પરં રોચતે મે શિવારાધનાગ્રેસરાગ્રેસરસ્ય ।
શિવારાધનાબોધકં શાસ્ત્રમેકં પ્રમાણં પ્રમાણેષુ વિશ્વાસબીજમ્ ॥ ૯૪॥

પરં જન્મજન્માન્તરાભ્યસ્તમેકં શિવારાધનાબોધકં શાસ્ત્રમેવ ।
યતસ્તદ્વિરુદ્ધેન માનાભિમાનો મમેશાન પાદારવિન્દે શપામિ ॥ ૯૫॥

મહાપત્તરઙ્ગાનુષઙ્ગેઽપિ શઙ્ગ ત્વદન્યં ન પશ્યામિ નારાધયામિ ।
ન ગૃહ્ણામિ નામાપિ સ્તૌમિ પ્રકામં ત્વદન્યસ્ય વાર્તાશ્ચ ગર્તે પતન્તઃ ॥ ૯૬॥ (સામિ)

મહામૃત્યુરાયાતુ મે યાતુ કિં મે ન તેનાપિ ભીતિર્મહામૃત્યુમૃત્યુઃ ।
યતો મન્મનઃપદ્મસદ્મપ્રવિષ્ટઃ સ દુષ્ટાનિ કષ્ટાનિ હર્તું સમર્થઃ ॥ ૯૭॥

સ્વકાલેઽપિ કાલો ન યાત્યન્તિકં મે સ કો વા વરાકઃ સ કિં નાતિરઙ્કઃ ।
સ ચેટીચપેટીતટાઘાતભીતઃ કૃતાન્તાન્તકારાધકાગ્રેસરસ્ય ॥ ૯૮॥

ઇયં મે મહાશૈવસઙ્ગાન્ન જાતા મતિઃ શઙ્કરારાધનાસાધનેષુ ।
પરં ત્વીશપાદારવિન્દપ્રસાદાત્ મહાશૈવવાર્તાપિ તાવત્ કલૌ ન ॥ ૯૯॥

કલિર્ધર્મદાવાનલસ્તત્ર વાર્તા મહાશૈવદેવદ્રુમસ્યેતિ શમ્ભોઃ ।
અહં તાવદેકો ભવત્પાદપદ્મપ્રસાદામૃતેનૈવ જીવામિ લોકે ॥ ૧૦૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભાવલિઙ્ગસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૩૬। ૮૧-૧૮૦॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 36. 81-180..

Proofread by Ruma Dewan

*Bhavalinga Stotram*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*